Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ शङ्करनारायणमन्त्रविधानं मन्त्रदेवताप्रकाशिकोक्तप्रकारेण लिख्यते—

नारद ऋषिः। अनुष्टुप् छन्दः। हरिहरो देवता। ह्रौं बीजम्। ह्रीं शक्तिः। ह्रां हृत्। ह्रीं शिरः। इत्याद्यङ्गानि॥

शूलं चक्रं पाञ्चजन्यं कपालं दधतं करैः।
स्वस्वभूगार्त (र्धे) नीलार्धदेहं हरिहरं भजे॥

ओं ह्रौं ह्रीं शङ्करनारायणाय नमः ओं ह्रौं ह्रीं॥ इति मन्त्रः।

प्रणवह्रौमित्यक्षरहृल्लेखाचतुर्थ्येकवचनान्तशशङ्करनारायणशब्दो नमश्शब्दः पुनः प्रणवह्रौमित्यक्षरहृल्लेखावसानोयं हरिहरमन्त्रः। लक्षं जपेत्। आज्यसिक्त-पायसेनायुतं हुनेत् पुरश्चरणार्थम्॥

अथ पूजा—

शैवपीठे समावाह्य अङ्गैः प्रथमावृतिः। लक्ष्म्यै० नारायण्यै० भूम्यै० भूधरायै० अम्बिकायै० त्र्यम्बकायै० आनन्दायै० गङ्गाधर्यै० ८ इति द्वितीया-वृतिः। इन्द्रादिभिस्तृतीया। प्रकृतिपुरुषैक्यात्मकहरिहरोपासनं सर्वसंपत्करं परम्। अत्र हरिहरात्माखण्डपरमात्माभेदानुसन्धानपूर्वको जपः संसृतिमोक्षकरः॥